"द्राक्षाचन्दनपद्मानि मुस्ता तिक्ताम्टतापि च ।
धात्री वालमुशीरञ्च लोध्रेन्द्रयवपर्पटाः ॥
परूषकं प्रियङ्गुश्च यवासो वासकस्तथा ।
मधुकं कुलकं वापि किरातो धान्यकं तथा ॥
एषां क्वाथो निहन्त्येव ज्वरं पित्तसमुत्थितम् ।
तृषां दाहं प्रलापञ्च रक्तपित्तं भ्रमं क्लमम् ॥
मूर्च्छां छर्द्दिं तथा शूलं मुखशोषमरोचकम् ।
कासं श्वासञ्च हृल्लासं नाशयेन्नात्र संशयः ॥"

इति महाद्राक्षादिक्वाथः ॥

"ससितो निशि पर्य्युषितः प्रातर्धन्याकतण्डुल-क्वाथः ।
पीतः शमयत्यचिरादन्तर्दाहं ज्वरं पैत्तम् ॥"

इति धन्याकक्वाथः ॥

"अम्टतायाः हिमः प्रातः ससितः पैत्तिकज्वरम् ।
वासायाश्च तथा कासरक्तपित्तज्वरान् जयेत् ॥"

इति अम्टतावासाक्वाथौ ॥

"गुडूची भूमिनिम्बञ्च बालं वीरणमूलकम् ।
लघुमुस्तं त्रिटद्धात्री द्राक्षा वासा च पर्प्पटः ॥
एषां क्वाथो हरत्येव ज्वरं पित्तकृतं द्रुतम् ।
सोपद्रवमपि प्रातर्निपीतो मधुना सह ॥"

इति गुडूच्यादिक्वाथः ॥

"पलाशस्य वदर्य्या वा निम्बस्य म्टदुपल्लवैः ।
अम्लपिष्टैः प्रलेपोऽयं हन्याद्दाहयुतं ज्वरम् ॥
उत्तानसुप्तस्य गभीरताम्र-
कांस्यादिपात्रे निहिते च नाभौ ।
शीताम्बुधारा बहुला पतन्ती
निहन्ति दाहं त्वरितं ज्वरञ्च ॥
पथ्यां तैलघृतक्षौद्रैर्लिहन् दाहज्वरापहा ।
कासाष्टक्पित्तवीसर्पश्वासान् हन्ति वमीनपि ॥"
तैलघृतक्षौद्रैरित्यत्र न समुच्चयः तेन केवलेन क्षौद्रेणापि लिह्यात् ।
"काञ्जिकार्द्रपटेनावगुण्ठनं दाहनाशनम् ।
अथ शीतक्रमुखिन्नशीतलीकृतवाससा ॥
द्राक्षामलककल्केन कवलोऽत्र हितो मतः ।
पक्वदाड़िमवीजैर्वा धन्याकल्केन च क्वचित् ॥"

इति कवलः ॥ धन्याच धान्याकम् ॥ * ॥

अथान्नमाह ।
"दाहवम्यर्दितं क्षामं निरन्नं तृषयान्वितम् ।
शर्करामधुसंयुक्तं पाययेल्लाजतर्पणम् ॥"
लाजतर्पणं लाजशक्तुरूपतर्पणम् । सन्तर्पण-स्वरूपमुक्तं सामान्यज्वरचिकित्सायाम् ।
"मुद्गयूषौदनो देयः सितया पैत्तिके ज्वरे ॥
हर्म्ये शुभ्राभ्रसङ्काशे शशाङ्करशीतले ।
मलयोदकसंसिक्ते सुप्यात् पित्तज्वरी नरः ॥
हारावलीचन्दनशीतलानां
सुगन्धपुष्पाम्बरभूषितानाम् ।
नितम्बिनीनां सुपयोधराणा-
मालिङ्गनान्याशु हरन्ति दाहम् ॥
आह्लादञ्चास्य विज्ञाय ताश्च स्त्री रमयेत् पुनः ।
हितञ्च भोजयेदन्नं न हितं सुरतं महत् ॥
वाप्यः कमलहासिन्यो जलयन्त्रगृहाः शुभाः ।
नार्य्यश्चन्दनदिग्धाङ्ग्यो दाहदैन्यहरा मताः ॥

इति पित्तज्वराधिकारः ।" इति भावप्रकाशे मध्यखण्डे प्रथमभागः ॥ * ॥
पित्तश्लेष्मज्वरनाशकौषधं यथा,—
"गुडूचीपद्मकारिष्टधन्याकं रक्तचन्दनम् ।
पित्तश्लेष्मज्वरच्छर्द्दिदाहतृष्णाघ्नमग्निकृत् ॥"

इति गारुड़े १८८ अध्यायः ॥

(अस्य सलक्षणचिकित्सितान्यपराणि यथा,—
"मूर्च्छा दाहो भ्रममदतृषावेगतीव्रोऽतिसार-स्तन्द्रालस्यं प्रलपनवमिः पाकताल्वोष्ठवक्त्रे ।
स्वेदः श्वासो भवति कटुकं विक्लत्वं क्षुधा वा एतैर्लिङ्गैर्भवति मनुजे पैत्तिको वै ज्वरस्तु ॥
रोध्रोत्पलाम्टतलता कमलं सिताढ्य
तत्सारिवासहितमेव हि पाचनेषु ।
निःक्वाथ्य पानमति चाशु निहन्ति पित्तं
पित्तज्वरप्रशमनं प्रकरोति पुंसाम् ॥
क्वथितं तण्डुलपयसा शक्राह्वकटुरोहिणीसहि-तम् ।
क्वाथं यष्टीमधुना विनाशनं पित्तज्वराणान्तु ।
दुरालभावासकपर्पटानां
प्रियङ्गुनिम्बैः कटुरोहिणीनाम् ।
किराततिक्तं क्वथितं कषायं
सशर्कराढ्य क्वथितञ्च पाचनम् ॥
सदाहपित्तज्वरमाशु हन्ति
तृष्णाभ्रमं शोषविकारयुक्तम् ।
एकोऽपि वै पर्पटको वरिष्ठः
पित्तज्वराणां शमनाय योग्यः ।
तस्मात् पुनर्नागरवालकाढ्यः
सिंहो यथा कङ्कटके प्रवृत्तः ॥
नागरोशीरमुस्ता च चन्दनं कटुरोहिणी ।
धान्यकानां क्वाथ एव पित्तज्वरविनाशनः ॥
अम्टतापर्पटोधात्री क्वाथः पित्तज्वरं हरेत् ।
सितारग्वधयोर्वापि काश्मर्य्याश्चाथ वा पुनः ॥
द्राक्षापर्पटकं तिक्ता पथ्यारग्वधमुस्तकैः ।
क्वाथस्तृषाभ्रमदाहयुक्तपित्तज्वापहः ॥
विदारिका रोध्रदधित्थकानां
स्वाम्लातुलुङ्गस्य च दाड़िमानाम् ।
यथानुलाभेन च मूलपत्रं
निहन्ति तृड्दाहसमूर्च्छनञ्च ॥
उत्तानस्य प्रसुप्तस्य कांस्यं वा ताम्रभाजनम् ।
नाभौ निधाय धाराम्बुशीतदाहनिवारणम् ॥
रम्यारामाकुचभरनमितालिङ्गनं पैत्तसङ्गं
व्यायामं सुनिवरगदितं शीतलं सेवनं स्यात् ।
शुभ्राम्भोजं मलयजसलिलासिक्तसंशीतपासो
मुक्ताहारो विशदसतुहिनं कौमुदी या सुखाय ॥
एभिर्हन्ति द्रुततरनिभं मानुषाणान्तु पित्तं
दाहं शोषं क्लममपि तथा तृड्भ्रमं मूर्च्छनञ्च ।
एतैर्योगैर्भवति नितरां पित्तदाहस्य शान्ति-र्योग्या चैव प्रभवति सदा सत्क्रिया श्रीमताञ्च ॥
यदि जिह्वा गलतालुशोषो वै मनुजस्य च ।
केशरं मातुलुङ्गस्य मधुसैन्धवसंयुतम् ।
पेष्यमाणं तालुलेपः सद्यः पित्ततृषापहः ॥"

इति पित्तज्वरचिकित्सा ॥ * ॥

पित्तद्रावी, [ न् ] पुं, ( पित्तं द्रावयतीति । द्रु + णिच् + णिनिः । ) मधुरजम्बीरः । इति राज-निर्घण्टः ॥

पित्तरक्तं, क्ली, ( पित्तसंसृष्टं रक्तमिति मध्यपद-लोपी समासः । ) रोगविशेषः । तत्पर्य्यायः । रक्तपित्तम् २ पित्तास्रम् ३ पित्तशोणितम् ४ । इति राजनिर्घण्टः ॥ अस्य विवरणं रक्तपित्त-शब्दे द्रष्टव्यम् ॥

पित्तलं, क्ली, (पित्तं तद्वर्णं लातीति । ला + कः ।) धातुविशेषः । पितल इति भाषा ॥ ( यथा, वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ।
"पित्तलञ्च तथा कांस्यं ताम्रवन्मारयेद्भिषक् ।
ताम्रवच्छोधनं तेषां ताम्रवद्गुणकारकम् ॥")
तत्पर्य्यायः । आरकूटम् २ रीतिः ३ पतिकावे-रम् ४ द्रवदारु ५ । इति जटाधरः ॥ रीती ६ । इति शब्दरत्नावली ॥ मिश्रम् ७ । इति रत्नमाला ॥ आरः ८ राजरीतिः ९ ब्रह्मरीतिः १० कपिला ११ पिङ्गला १२ । इति भाव-प्रकाशः ॥ क्षुद्रसुवर्णः १३ सिंहलम् १४ पिङ्ग-लकम् १५ पीतलकम् १६ लोहितकम् १७ पिङ्गललोहम् १८ पीतकम् १९ । रीतिका-युगलगुणाः । तिक्तत्वम् । शीतलत्वम् । रसे लवणत्वम् । शोधनत्वम् । पाण्डुवातकृमिप्लीह-पित्तनाशित्वञ्च ।
"शुक्ला स्निग्धा म्टदुः शीता सुरङ्गा सूक्ष्मपत्रिणी ।
हेमोपमा शुभा स्वच्छा जात्या रीतिः प्रकी-र्त्तिता ॥"

इति राजनिर्घण्टः ॥

"रीतिरप्युपधातुः स्यात् ताम्रस्य यशदस्य च ।
पित्तलस्य गुणा ज्ञेयाः स्वयोनिसदृशा जनैः ॥
संयोगस्य प्रभावेण तस्यान्येऽपि गुणाः स्मृताः ।
रीतिकायुगलं रूक्षं तिक्तञ्च लवणं रसे ।
शोधनं पाण्डुरोगघ्नं क्रमिघ्नं नातिलेखनम् ॥"

इति भावप्रकाशः ॥ * ॥

भूर्ज्जपत्रम् । इति शब्दमाला । ( बाहुल्येन पित्तमस्त्यस्येति । पित्त + "सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति लच् । ) पित्तयुक्ते, त्रि । इति मेदिनी । ले, ११४ ॥ ( पित्तवृद्धिकरे च । यथा, सुश्रुते सूत्रस्थाने । ४५ अध्याये ।
"सक्षारं पित्तलं कौपं श्लेष्मघ्नं दीपनं लघु ॥"
यथा च माधवकरकृतरुग्विनिश्चयसंग्रहे पाण्ड्वधि-कारे ।
"पाण्डुरोगी तु योऽत्यर्थं पित्तलानि निषेवते ।
तस्य पित्तमसृङ्मांसं दग्ध्वा रोगाय कल्पते ॥")

पित्तला, स्त्री, ( पित्तल + टाप् । ) तोयपिप्पली । इति मेदिनी । ले, ११४ ॥

पित्तारिः, पुं, ( पित्तानामरिर्नाशकः । ) पर्प्पटः । लाक्षा । वर्व्वरम् । इति राजनिर्घण्टः ॥

पित्र्यं, क्ली, (पितरो देवता अस्येति । पितृ + "वाय्-वृतुपित्रुषसो यत् ।" ४ । २ । ३१ । इति यत् । "रीङृतः ।" ७ । ४ । २७ । इति रीङादेशश्च । पितृदेवताकदानीयत्वादस्य तथात्वम् । ) मधु ।